# Morning salutations to shiva

# શ્રીવિશ્વનાથ સુપ્રભાતં

## Document Information

Text title : Morning salutations to shiva

File name : vishwa-suprabhaatam.itx

Category : suprabhAta, shiva

Location : doc_shiva

Author : Traditional

Transliterated by : Subramanian Ganesh sgesh at hotmail.com

Proofread by : Subramanian Ganesh sgesh at hotmail.com

Latest update : November 29, 2000, Deember 31, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીવિશ્વનાથ સુપ્રભાતં

ઉત્તિષ્ટ ભૈરવસ્વામિન્ કાશિકાપુરપાલક ।
શ્રીવિશ્વનાથભક્તાનાં સમ્પૂરય મનોરથમ્ ॥ ૧॥

સ્નાનાય ગાઙ્ગસલિલેઽથ સમર્ચનાય વિશ્વેશ્વરસ્ય બહુભક્તજના ઉપેતાઃ ।
શ્રીકાલભૈરવ લસન્તિ ભવન્નિદેશં ઉત્તિષ્ટ દર્શય દશાં તવ સુપ્રભાતમ્ ॥ ૨॥

યાગવ્રતાદિબહુપુણ્યવશં યથા ત્વં પાપાત્મનામપિ તથા સુગતિપ્રદાઽસિ ।
કારુણ્યપૂરમયિ શૈલસુતાસપત્નિ માતર્ભગીરથસુતે તવ સુપ્રભાતમ્ ॥ ૩॥

દુગ્ધપ્રવાહકમનીયતરઙ્ગભઙ્ગે પુણ્યપ્રવાહપરિપાથિતભક્તસઙ્ગે ।
નિત્યં તપસ્વિજનસેવિતપાદપદ્મે ગઙ્ગે શરણ્યશિવદે તવ સુપ્રભાતમ્ ॥ ૪॥

વારાણસીસ્થિતગજાનન ધુણ્ઢિરાજ સમ્પ્રાર્થિતેઽષ્ટફલદાનસમર્થમૂર્તે ।
ઉત્તિષ્ટ વિઘ્નવિરહાય ભજામહે ત્વાં શ્રીપાર્વતીતનય ભોસ્તવ સુપ્રભાતમ્ ॥ ૫॥

પૂજાસ્પદ પ્રથમમેવ સુરેશુ મધ્યે સમ્પૂરણે કુશલ ભક્તમનોરથાનામ્ ।
ગીર્વાણવૃન્દપરિપૂજિતપાદપદ્મ સંજાયતાં ગણપતે તવ સુપ્રભાતમ્ ॥ ૬॥

કાત્યાયની પ્રમથનાથશરીરભાગે ભક્તાલિગીતમુખરીકૃતપાદપદ્મે ।
બ્રહ્માદિદેવગણવન્દિતદિવ્યશૌર્યે શ્રીવિશ્વનાથદયિતે તવ સુપ્રભાતમ્ ॥ ૭॥

પ્રાતઃ પ્રસીદ વિમલે કમલાયતાક્ષિ કારુણ્યપૂર્ણહૃદયે નમતાં શરણ્યે ।
નિર્ધૂતપાપનિચયે સુરપૂજિતાંઘ્રે શ્રીવિશ્વનાથદયિતે તવ સુપ્રભાતમ્ ॥ ૮॥

સસ્યાનુકૂલજલવર્ષણકાર્યહેતોઃ શાકમ્ભરીતિ તવ નામ ભુવિ પ્રસિદ્મ્ ।
સસ્યાતિજાતમિહ શુષ્યતિ ચાન્નપૂર્ણે ઉત્તિષ્ટ સર્વફલદે તવ સુપ્રભાતમ્ ॥ ૯॥

સર્વોત્તમં માનવજન્મ લબ્ધ્વા હિનસ્તિ જીવાન્ ભુવિ મર્ત્યવર્ગઃ ।
તદ્વારણાયાશુ જહીહિ નિદ્રાં દેવ્યન્નપૂર્ણે તવ સુપ્રભાતમ્ ॥ ૧૦॥

શ્રીકણ્ઠ કણ્ઠધૃતપન્નગ નીલકણ્ઠ સોત્કણ્ઠભક્તનિવહોપહિતોપકણ્ઠ ।
ઉત્તિષ્ટ સર્વજનમઙ્ગલસાધનાય વિશ્વપ્રજાપ્રથિતભદ્ર જહીહિ નિદ્રામ્ ॥ ૧૧॥

ગઙ્ગાધરાદ્રિતનયાપ્રિય શાન્તમૂર્તે વેદાન્તવેદ્ય સકલેશ્વર વિશ્વમૂર્તે ।
કૂટસ્થનિત્ય નિખિલાગમગીતકીર્તે દેવાસુરાર્ચિત વિભો તવ સુપ્રભાતમ્ ॥ ૧૨॥

શ્રીવિશ્વનાથકરુણામૃતપૂર્ણસિન્ધો શીતાંશુખણ્ડસમલંકૃતભવ્યચૂડ ।
ભસ્માઙ્ગરાગપરિશોભિતસર્વદેહ વારાણસીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૩॥

દેવાદિદેવ ત્રિપુરાન્તક દિવ્યભાવ ગઙ્ગાધર પ્રમથવન્દિત સુન્દરાઙ્ગ ।
નાગેન્દ્રહાર નતભક્તભયાપહાર વારાણસીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૪॥

વેદાન્તશાસ્ત્રવિશદીકૃતદિવ્યમૂર્તે પ્રત્યૂષકાલમુનિપુઙ્ગવગીતકીર્તે ।
ત્વચ્યર્પિતાર્જિતસમસ્તસુરક્ષણસ્ય વારાણસીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૫॥

કૈલાસવાસમુનિસેવિતપાદપદ્મ ગઙ્ગાજલૌઘપરિષિક્તજટાકલાપ ।
વાચામગોચરવિભો જટિલત્રિનેત્ર વારાણસીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૬॥

શ્રીપાર્વતીહૃદયવલ્લભ પઞ્ચવક્ત્ર શ્રીનીલકણ્ઠ નૃકપાલકલાપમાલ ।
શ્રીવિશ્વનાથમૃદુપંકજમંજુપાદ શ્રીકાશિકાપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૭॥

કાશી ત્રિતાપહરણી શિવસદ્મભૂતા શર્મેશ્વરી ત્રિજગતાં સુપુરીષુ હૃદ્યા ।
વિદ્યાકલાસુ નવકૌશલદાનશીલા શ્રીકાશિકાપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૮॥

શ્રીવિશ્વનાથ તવ પાદયુગં સ્મરામિ ગઙ્ગામઘાપહરણીં શિરશા નમામિ ।
વાચં તવૈવ યશસાઽનઘ ભૂષયામિ  વારાણસીપુરપતે તવ સુપ્રભાતમ્ ॥ ૧૯॥

નારીનતેશ્વરયુતં નિજચારુરૂપં સ્ત્રીગૌરવં જગતિ વર્ધયિતું તનોષિ ।
ગઙ્ગાં હિ ધારયસિ મૂર્ધ્નિ તથૈવ દેવ વારાણસીપુરપતે તવ સુપ્રભાતમ્ ॥ ૨૦॥

ત્વમેવ માતા ચ પિતા ત્વમેવ ત્વમેવ બન્ધુશ્ચ સખા ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ ત્વમેવ સર્વં મમ દેવદેવ ॥

ૐ મઙ્ગલં ભગવાન્ શમ્ભો મઙ્ગલમ્ વૃષભધ્વજ ।
મઙ્ગલં પાર્વતીનાથ મઙ્ગલં ભક્તવત્સલ ॥

। એતત્ શ્લોકદ્વયં પ્રાચીનકવિકૃતમ્ ।

ઇતિ શ્રીવિશ્વનાથસુપ્રભાતં સમ્પૂર્ણમ્ ।

Encoded by Subramanian Ganesh sgesh@hotmail.com

*Morning salutations to shiva*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*